# गीता माहात्म्यम्

# gītā māhātmyam

गीताशास्त्रं इदं पुण्यं यः पठेत्प्रयतः पुमान्।
विष्णोः पदमवाप्नोति भयशोकादिवर्जितः॥१॥
gītāśāstraṁ idaṁ puṇyaṁ yaḥ paṭhetprayataḥ pumān|
viṣṇoḥ padamavāpnoti bhayaśokādivarjitaḥ||1||

गीताध्ययनशीलस्य प्राणायामपरस्य च।
नैव सन्ति हि पापानि पूर्वजन्मकृतानि च॥२॥
gītādhyayanaśīlasya prāṇāyāmaparasya ca|
naiva santi hi pāpāni pūrvajanmakṛtāni ca||2||

मलनिर्मोचनं पुंसां जलस्नानं दिने दिने।
सद्गीताम्भसि स्नानं संसारमलनाशनम्॥३॥
malanirmocanaṁ puṁsāṁ jalasnānaṁ dine dine|
sakṛ̆dgītāmbhasi snānaṁ saṁsāramalanāśanam||3||

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिः सृता॥४॥
gītā sugītā kartavyā kimanyaiḥ śāstravistaraiḥ|
yā svayaṁ padmanābhasya mukhapadmādviniḥ
sṛtā||4|

# गीता माहात्म्यम्

# gītā māhātmyam

भारतामृतसर्वस्वं विष्णोर्वक्त्राद्विनिः सृतम्।
गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते॥५॥
bhāratāmṛtasarvasvaṁ viṣṇorvaktrādviniḥ sṛtam|
gītāgaṅgodakaṁ pītvā punarjanma na vidyate||5||

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥६॥
sarvopaniṣado gāvo dogdhā gopālanandanaḥ|
pārtho vatsaḥ sudhīrbhoktā dugdhaṁ gītāmṛtaṁ mahat||6||

एकं शास्त्रं देवकीपुत्रगीतम् एको देवो देवकिपुत्र एव।
एको मन्त्र तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा॥७॥
ekaṁ śāstraṁ devakīputragītam eko devo devakiputra eva |
eko mantra tasya nāmāni yāni karmāpyekaṁ tasya devasya sevā||7||